तर्भहिश्रुतस्सर्वव्यापनारायणस्थितइत्यादिश्रुतिसमस्तसिद्धस्येश्वरस्येत्यर्थः एवतन्त्रान्तर्यामिमतःएवसर्वेश्वरःततस्तम्मन्यामपिकस्यचित्पतेस्वोध्वनःपरमाप्नोतिन
हिमोःपरमंपदमित्यादिश्रुतिभ्यःनारायणस्यनित्यमुक्तत्वसर्वेश्वरत्वसमाधिकाररहितत्वमुक्तप्राप्यत्वादिश्रवणेनतद्विरोधप्रसंगादित्यर्थः तस्मादिति मुक्तस्येश्वरभावापत्तौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ले॰
चं॰टी॰
७

बाधकाभावादित्यर्थः न तु बाधकाभावेपि साधकमानं विना कथमीश्वरभावापत्तिर्मुक्तस्य सिध्यतीत्याशंक्य तत्प्रमाणमाह अयमेवेति अस्मिन् ब्रह्मणः परमात्मनउपलब्धिस्था
नभूते पुरे शरीरे यदिदं दहरमल्पं पुंडरीकमस्ति वेश्माकारमस्मिन् पुंडरीके अंतर्दहर आकाशोयः अनंतः संभृतोकाशो वाजीवोवापरमेश्वरोवेति संशये त्रोवित्तोलाद्भूताकाश
इत्येकः पूर्वपक्षः आकाशाद्विशेषणाद्दहरत्वलिंगाद्दल्पोपाधिपरिच्छिन्नो जीवइति द्वितीयः पूर्वपक्षः पक्षद्वयनिषेधपूर्वकं सिद्धांतं वदन् सूत्रमाचष्टे नभूताकाश
इत्यादिना आकाशे बहुभवे दश उदाहरति उभे इति अस्मिन्नंतर्दहराकाशे समाहिते स्थिते अयमाकाशो भूताकाशः एतच्चद्युभाभ्यां दहराकाशो निर्दिष्टः जितुत्स्या
भवत्येकात्ततद्वि हितापि पासावहितेन स्वात्मभूताकाशो भूताकाशोपमितत्वसत्यकामत्वायोगेन संभवतीति निरासः परिच्छिन्ने जीवे आकाशोपमितत्वद्यावापृथिव्या
दिजगदाधारत्वापहतपाप्मत्वादयो गुणानसंभवंतीति जीवनिरासः उक्तहेतुनापरमेश्वरोसंभवादाकाशस्य तत्रनिरूढत्वाच्च सएवदहराकाशस्तस्यदहरत्वंतु ना
स्वाभाविकं किंतूपासनार्थं कल्पितमणीयस्त्वादिवदिति निर्णयः सत्त्वानंतरेण जीवेप्यपहतपाप्मत्वादिगुणाष्टकमस्तीति तन्निरूपणाष्टकं तेनैणयकेनभवतीतिस्पष्टी

कृतं परमेश्वरउत्तरेभ्योवाक्यशेषेभ्यः उभेअस्मिन्द्यावापृथिवीअंतरेवसमाहिते यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाश एषआत्माअपहतपाप्मावि
जरोविमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पइत्यादिनाप्रतिपाद्यमानेभ्यो द्यावापृथिव्याधारत्वलक्षणगुणेभ्योहेतुभ्यइतिनिर्णीयउत्तरा
च्चेदाविर्भूतस्वरूपस्त्वितिसूत्रांतरेण दहरविद्यानंतरंमिद्यमजापतिसंवादेयआत्माअपहतपाप्माइत्यादिनापहतपाप्मत्वादिगुणाष्टकत्वयोक्तमात्मानमुपदे
श्यउपदिश्ययएषोक्षिणिपुरुषोदृश्यतेएषआत्मेतिजाग्रदवस्थायांद्रष्टृत्वेनाक्षिसंनिहितस्यपपुष्पसेमहीयमानश्चरत्येषआत्मेतिस्वप्नावस्थापन्नस्यतद्यत्रै

कृत्स्नसमाहृतान् सुप्तवकारोमुक्तस्येश्वरभावापत्तिमाहेतिसंबंधः जीवेपिगुणाष्टकमस्तीत्यत्रगुणाष्टकयुक्तमात्मानमुपदेश्यमुपदिश्यजीवस्योपदेशादितिकेतुः
गुणाष्टकयुक्तमात्मानमुपदेश्यत्वेनोपक्रम्यप्रजापतिनाजीवउपदिष्टइतिकथमवगम्यतइत्यतआहयएषोक्षिणीत्यादिनाप्रजापतिनाहिपूर्वीयचतुष्टयेनात्माइ
दृश्यस्त्वपदिष्टः तत्रप्रथमपर्यायवाक्यएषोक्षिणीति पुरुषोजीवः अक्षिद्वारेणसर्वेन्द्रियोपलक्षणार्थंचद्वारादिभूरूपाद्युपलब्धिक्रियाकर्त्वेनद्रष्टासन्यःपुरुषोदृ
श्यते रूपाद्युपलब्धिक्रियाकर्तृत्वेनानुमीयते एषद्रष्टावाभ्यापिष्टआत्मेतींद्रदविरोचनौप्रतिप्रजापतेरुपदेशस्तत्रादितिग्रहणेनजाग्रदवस्थानातजीवएवविवक्षितइति
प्रतीयते अवस्थांतरेष्विंद्रियव्यापाराभावादितिमत्वाप्रथमपर्यायवाक्यस्ततात्पर्यमाहजाग्रदवस्थायामिति द्रष्टृत्वेनेति इंद्रियैःरूपादिद्रष्टृत्वेनेत्यर्थः अक्षिसंनिहितस्य
स्वप्नावस्थापन्नस्यतस्यैवस्वप्नावस्थात्रयोजीर्णस्यचजीवस्योपदेशादितिसंबंधः द्वितीयपर्यायवाक्यमुदाहरति यएषस्वप्नेमहीयमानश्चरतिस्त्र्यादिभिः सुप्त
मानश्चरत्यर्थः चरतिविषयानवासनामयाननुभवतियःएषइंद्रेणत्वयापृष्टआत्मेत्यर्थः तृतीयपर्यायवाक्यमुदाहरति तद्यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नं
स्वापप्राप्तःसमस्तःसम्यग्विलीनकरणग्रामःसंप्रसन्नःस्वरूपानंदानुभवचान्स्वप्नमपिनविजानातिएषप्रत्यक्षयापृष्टआत्मेत्यर्थः चतुर्थपर्यायवाक्यमुदाहरतिए ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं प्रसादाद्इति सममकृप्रसीदत्यस्मिन् जीव इति श्रुतिप्रसादात् संप्रसादः शब्दः सुषुप्तावस्थानवाचकः सन् सुषुप्तावस्थोपलक्षितं जीवमुपलक्षयति शरीरादुत्क्रम्य
परं ज्योतिरित्यादिसमुपसंपद्यादिश्रुत्योपलक्षितेन देवयानमार्गप्राप्तत्वेन सकार्येणोपासनाफलभूतैश्वर्यविशिष्टेन रूपेणाभिनिष्पद्यते ब्रह्मलोकगतउपास
कस्तत्त्वतः शुकवत् पक्रान्तउपहतपाप्मत्वादिगुणक इति पूर्वपक्षे तृतीयस्य चतुर्थपर्यायवाक्ये उद्दिष्टः तत्प्रजापतिवाक्ये पर्यायचतुष्टयस्य जाग्रदवस्थापन्नजीव
विषयकत्वमनुपपन्नं प्रथमपर्याये जाग्रदवस्थावाचिपदाभावेन तस्य जाग्रज्जीवविषयकत्वस्यास्फुटत्वात् न च प्रथमपर्याये इन्द्रविरोचनाभ्यां पृष्टोपहत
पाप्मत्वादिगुणात्मैव निर्दिष्टः स च ब्रह्मैवेति प्रजापतिवाक्येपि ब्रह्मण एव गुणाष्टकमुपदिष्टं न जीवस्येति चोद्यस्यात्र नावकाशस्तस्मात् य एष स्वप्न इत्या
दिपर्यायेष्वपि स्फुटेति स्फुटानि स्वमस्तापशरीरात्मस्थानरूपाणि जीवलिंगानि येषु तेषामेव जीवलिंगविषयत्वे तेषां ब्रह्मविषयकत्वचोद्यानवकाशा
त् प्रथमपर्यायस्य तत्र स्फुटजीवलिंगस्य ब्रह्मविषयकत्वमिति चोद्यं सावकाशमिति भ्रमेण न कर्तव्यः सत्यहेतुमाह भवतिपर्यायमिति द्वितीयतृतीयपर्यायस्यादौ एतं त्वेव ते
भूयोनुव्याख्यास्यामि इति श्रवणेन प्रथमपर्यायस्य ब्रह्मविषयत्वासंभवादिति सर्थः एतदुक्तं भवति द्वितीयादिपर्यायत्रयस्य जीवविषयत्वं तावत् प्रतिपन्नं प्रथमपर्या

तत्त्वतः समस्तसंप्रसन्नः स्वप्नं न विजानाति एष आत्मेति सुषुप्तावस्थापन्नस्य एवं संप्रसादोस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यते उत्तमः पुरुष इत्यवस्थात्रयोत्तीर्णस्य च जीवस्योपदेशात् जीवस्यैवोपहतपाप्मत्वादिगुणाष्टकं न दहरवाक्यस्य परमेश्वरत्वनिर्णायकमेव
स्वप्रश्नादिपर्यायेषु प्रतिपर्यायमेतं त्वेव ते भूयोनुव्याख्यास्यामीति श्रवणेन स्फुटस्वमादिजीवलिंगानां द्वितीयादिपर्यायाणामेव जीवविषयत्वं प्रथमप
र्यायस्य ब्रह्मविषयत्वमिति चोद्यानवकाशादित्याशक्य तत्र चतुर्थपर्याये निरूप्यमाणः सकलबंधविमुक्तत्वेनाविर्भूतस्वरूपो जीवः प्रतिपाद्यः ॥

यस्यापि जीवविषयत्वं वक्तव्यं प्रथमपर्यायनिर्दिष्टस्यैव एतदमृतमभयमेतद्ब्रह्मेत्याम्नातामृतत्वाभयत्वादिगुणकत्वात् इति एतेन प्रथमपर्यायस्य चतुर्णोलकस्य
प्रतिबिंबविषयत्वमेव तस्यादित्यरूपप्रमानत्वसंभवादिति चोद्यमपि निरस्तं द्वितीयपर्यायगतैतमेतेन प्रथमपर्यायनिर्दिष्टगुणकमात्मकमुच्यमानस्योत्तरत्रस्व
प्रजीवत्वरूपत्वोपदेशात् प्रथमपर्यायप्रत्यभिज्ञानिर्दिष्टस्य गुणकस्यात्मनत्वाभयत्वब्रह्मत्वसंकीर्तनात्तु न प्रतिबिंबेतत्संभवति न च जीवस्यापि तदसंभव इ
ति वाच्यं जाग्रदाद्यवस्थात्रयम् तत्रादेहसंभवेप्यवस्थात्रयोत्तीर्णस्य तस्य प्रजापतिवाक्यगतमामारणासंभवादिति सर्वं च एतादृशाः एवं तर्हि द्वितीयपर्यायकाभ्या
गं व्याख्यात्या आविर्भूतस्वरूपत्वमिति सिद्धान्तभागोव्याख्येयः तत्र चतुर्थेति पर्यायमध्यस्थप्रत्यर्थः सकलेति तत्तत्साक्षात्कारेण विद्यानिवृत्तौ सत्यां तत्तत्कृत सकल
बंधविनिर्मुक्त्या आविर्भूतमसंकुचितमपहतपाप्मत्वादिलक्षणं स्वरूपमस्येत्याविर्भूतस्वरूपो जीवः प्रतिपाद्यत इत्यर्थः ननु चतुर्थपर्यायेपि पूर्वपर्यायेष्विव सतापी
नैवकृतोनन्निरूप्यते तत्रपर्यायेपि शरीरात्समुत्थायेति शरीरावधिकोत्क्रान्त्यवस्थाविशेषविशिष्टस्य संसारिणएवास्य संप्रतीतेरित्याशंकोक्तावचथा
णार्थकत्वमाहआव्याने परिहरति

व॰

सि॰ ले॰ नन्विति नचेति संसारित्यमर्थः तथा च चतुर्थपर्यायेपि संसारित्वपवनिरूपणे इदं हेयमिष्टसाधनत्वप्राप्यत्वादिगुणकस्य प्रजापतिना प्रत्युपदिष्टत्वात् प्रजापति
चं॰ टी॰ वाक्यप्रतिवचनमेव न स्यादतः चतुर्थपर्यायो गुणाष्टकयोग्यमुक्तजीवविषय एवेत्यर्थः नच सर्वांल्लोकानाप्नोतीत्यादिना सगुणविद्याया ब्रह्मलोकं गतस्यापहतपाप्मत्वादि
८ गुणाष्टकसंभवात्संसारितिकमुक्तविषयत्वं चतुर्थपर्यायस्य न घटत इत्यत आह तथा च संसारिविषयत्वमेवास्यापि पर्यायस्येति वाच्यं सगुणविद्याफलभूतस्यापि तस्यावि
द्यानिवृत्त्यादेरभावेन निरंकुशापहतपाप्मत्वादिरसंभवात् प्रजापतिवाक्यस्य निर्गुणब्रह्मपरत्वस्य समन्वयाध्याय एव समर्थितत्वाच्च निरूपितत्वाच्चेति तदिदमुक्तं
त्यादिसंभवश्चेति भावः तथा चोक्तं तात्पर्यचन्द्रिकायां चतुर्थपर्यायस्यायमर्थः शरीरात्समुत्थाय शरीरत्रयविलक्षणं स्वपदलक्ष्यस्य निर्णय परं ज्योतिर्ब्रह्मतदु
पसंपत्तिस्तत्साक्षात्कारः तत्फलं मुक्तिः स्वरूपाविर्भावः स्वेन रूपेणाभिनिष्पद्यत इत्युक्तं उत्तमः पुरुषः परमात्मेति ननु चतुर्थपर्यायस्येव वक्ष्यमाणगुणाष्ट
कफलकात्मनिरूपणपरत्वे पूर्वपर्यायाणामवस्थात्रयोपन्यासरूपाणां वैयर्थ्यं स्यादित्यत आह अवस्थात्रयोपन्यासस्येति जाग्रदवस्थायामथ तत्त्वविनापात्वा

नन्तु सांसारिकावस्थाभेदकल्पितः तत्तत्ससंकल्पत्वादिगुणवाधादवस्थात्रयोपन्यासस्य तत्तदवस्थादोषाभिधाने न च तुर्यपर्यायोपदेशशेषत्व
प्रतिपत्तेरिति समाधानः स्यात् चकारश्चतुर्थपर्यायप्रतिपाद्यस्य मुक्तस्यैश्वर्यभावापत्तिस्पष्टमाह तदभावे मुक्तेपि सत्यसंकल्पत्वाद्ययोगात् अत उक्तं तस्य
गुणाष्टकस्यैश्वर्यादयस्त्वाविर्भावे हेतुत्वं कापरिहारात्लाभाच्च तस्मिन्नत्र्वेतस्माद्विद्याशास्त्रपस्यापि तमपारमार्थिकमेव जैवं रूपं कल्पितमोक्तं त्वरागद्वे
षकल्पितमनेकानर्थयोगितद्विलक्षणेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं च पविद्यापत्तिपद्यतइतिभाष्यकारोक्तिस्पष्टमुक्तस्य सत्यगुणस्य

दिदोषाभिधानेन स्वप्नावस्थायां स्वपरज्ञानाभावविनष्टप्रायत्वादिदोषाभिधानेन चावस्थात्रयकल्पितस्य जैवरूपस्य लोकासिद्धस्य हेयत्वज्ञापनद्वारा तज्जि
हासोरधिकारिणो वाक्यब्रह्मस्वरूपनिरूपणार्थं चतुर्थपर्यायप्रवृत्तिरिति अवगमात् पूर्वपर्यायाणां च तुर्यपर्यायशेषत्वं प्रतीयते अतो नैते वा वै पर्यायामित्यर्थः
समाधानेति अपहतपाप्मत्वादिगुणाष्टकं दहराकाशस्येश्वरनिर्णायकं न भवति प्रजापतिवाक्ये जीवेपि गुणाष्टकसत्त्वेन तस्य व्यभिचारित्वादित्याशंकाप्र
जापतिवाक्ये मुक्तजीवः गुणाष्टकयुक्तः प्रतिपाद्यते न तु बद्धजीवः ततो न गुणाष्टकस्य परमेश्वरात् जीवावृत्तत्वेन तस्मात् ज्ञापित्त्वेन व्यभिचारित्वाभि
र्णायकत्वनस्याद्दितिसमाधानमित्यर्थः नतु नतत्रसत्यसंकल्पत्वादिगुणवाधादितिपूर्वग्रन्थेन च तुर्यपर्याये गुणाष्टकफलको मुक्तजीवः प्रतिपाद्यत इति स्व
बता सूर्ये चारिणे तेनावता भुक्तस्यैश्वर्यभावापत्तिः कथं सूत्रकारेणोक्ता तत्राह तदभाव इति मुक्तस्यैश्वर्यभावापत्त्यभावे च बद्धजीववन्मुक्तजीवेपि निरस्तोपाधिके
तत्सत्संकल्पत्वादिगुणायोगात् गुणाष्टकफलकत्वमात्मनो निरूपणं प्रजापतिवाक्ये न स्यादतो मुक्तजीवस्य गुणाष्टकफलकत्वमीश्वरभावापत्त्येवेति सूत्रकारस्य ८
तात्पर्यं निश्चीयत इत्यर्थः ननु जीवेश्वरयोर्वस्तुतः एव भिन्नत्वान्मुक्तस्य नेश्वरभावापत्त्या गुणाष्टकयोगः किं तु स्वत एवेत्याशंक्यो निराकरोति अत उक्तमस्येति उ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पक्रमेश्च तस्येत्यर्थः कृतेनेति गुणाष्टकस्य जीवस्वाधारणत्वेनेश्वरासाधारणत्वाभावात्तेश्वरलिंगत्वं गुणाष्टकस्येति पापशंकाऽनुपपन्नेति सूत्रभागेन कृता तस्याः शंका
या गुणाष्टकस्य मुक्तस्य स्वरूपत्वमेवेश्वराज्जिन्नत्वपदे परिहारो न लभ्यते तथा च सूत्रविरोधात् तत्र मुक्तस्येश्वराभेदेनावस्थानमिति भावः तस्मिन्नपि उत्तराच्चेदाविर्भू
तस्वरूपस्त्विति नास्मिन्निमित्यर्थः तस्मादिति जीवब्रह्माभेदस्य वास्तवत्वादित्यर्थः तस्मादित्यनन्तरं यदिति पूर्वेणान्वयः तं च विद्यया तद्विलयेनाविद्यकसंसारनिवृ
त्तिद्वारा संसारविलक्षणं ब्रह्मत्वं निष्पद्यत इत्यर्थः ननु मुक्तस्येश्वरभावापत्तौ किमुत्तराच्चेदिति सूत्रभागकृतशंकापरिहारालाभप्रसंगो नियामकत्वेनाभिमतः किंवा
प्रजापतिवाक्यमेव मुक्तस्येश्वरभावापत्तौ नियामकत्वेनाभिमतं नाद्यः मुक्तस्य विंबभूतेश्वरभावापत्तिं विना केवलचिन्मात्ररूपेणावस्थानाभ्युपगमेऽपि गुणाष्ट
कस्य विम्बभूतेश्वराद्भेदाभावेन तस्य तत्तदसाधारणस्य हृदयाकाशादेरीश्वरत्वनिर्णायकत्वसम्भवात् नाद्वितीयः निर्गुणविद्याप्रकरणस्थप्रजापतिवाक्ये गुणा
ष्टकमविवक्षितत्वेन मुक्तजीवेऽपि गुणाष्टकबोधिश्रुत्यस्याप्रतिपाद्यत्वात् ज्ञेयब्रह्मप्रकरणे गुणाबोधिश्रुत्यस्याप्रतिपाद्यत्वमानेनोपाधिकरणारम्भभाष्ये स्पष्टमभिहि
ते तथा च भाष्यं एकमपि ब्रह्मापेक्षितोपाधिसंबन्धं निरस्तोपाधिसंबन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यत इति ग्रन्थभाष्ये देहान्ते निरस्तोपाधिसंबन्धं ब्रह्म ज्ञे
यत्वेनोपदिश्यत इत्युक्त्या ज्ञेयब्रह्मप्रकरणे गुणाबोधिश्रुत्यस्याप्रतिपाद्यत्वं स्पष्टं प्रतीयते अत एवास्मिन्नेव ज्ञेयब्रह्मप्रकरणे वेदान्तानां संसारगोचरत्वमिति जनकत्वेन च

रभावापत्तिमाह श्रुतिविरोधापत्तेरित्येष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष एवासाधु कर्म कारयति तं यमधो निनीषत इत्यादिश्रुतेस्तत्र
कर्मकर्तृत्वेन कारयितृत्वेन चोपकार्योपकारकभावेनावगतयोर्जीवेश्वरयोरंशांशिभावरूपसंबन्धरूपणार्थत्वेनावतारितेऽप्येतन्नामपदेशादित्यधिक

परणेऽर्थत्वमिष्यते तस्मात्प्रजापतिवाक्योपक्रमेऽपि तं तस्मात्कल्पतादिकं हृदयारण्यकवाक्याध्यायादिगतसर्वेश्वरत्वादिगुणजातं चन्द्रे एव ब्रह्मप्रशंसापरत्वमुपल
क्षणमन्येवानन्तदहरविद्यागतगुणाष्टकवत्प्रतिपाद्यं तद्विपरीतमपरं तया सत्यत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यत इति भाष्यमपि सगुणाष्टकोपल
क्षितं ब्रह्म प्रतिपद्यत इति योजनीयम् ननु मुक्तेश्वरभावापत्तौ नोदाहृतश्रुतिनिसूत्रभाष्योक्तप्रमाणं भविष्यतीत्यत आह श्रुतिविरोधाध्यायेऽपीति वेदान्तसम
न्वयस्य प्रथमाध्याये निरूपितस्य मानान्तरविरोधसमाधानप्रतिपादके द्वितीयाध्याये योऽर्थः श्रुतिविरोधाध्यायेऽपि समाहितेन शाकाग्रन्थेन भाष्यकारो मुक्तस्ये
श्वरभावापत्तिं स्पष्टीचकारेति संबंधः उन्निनीषत इत्युक्तं लोकेनेतुमिच्छतीति यावत् कर्मकर्ता जीव उपकार्यः कर्मकारयिता ईश्वर उपकारक इति तयोः क
स्यावगतोपकार्योपकारकभाववत्त्वात् सामान्यतः कश्चित्संबंधोऽवगतः संबंधं विना लोके तथा व्यवहाराभावात् स च संबंधः क इति विशेषाकांक्षायां तयोरंशां
शिभावसंबन्ध इति निरूपणार्थत्वेनेत्यर्थः जीव ईश्वरस्यांशः कुतः नानाव्यपदेशादित्यादि सूत्रभागगतार्थः भाष्यपदाति जीवस्येश्वरस्यांशत्वेनेश्व
रस्यांशांशिभूतेन सकलजीवगतदुःखैर्भोक्तृकीदोषप्रसंगादाह तत्रस्थेति तस्मदंशीश्वरपरं अत इति ईश्वरांशे सकलशास्त्रीवस्थितसंसारोगीकरणेनेव वर
मीश्वरदुःख्याईश्वरस्यानुपाये सम्यग्ज्ञानेनोपायेन प्रवर्तितेन तन्मुक्त्या न प्राप्तव्यमप्रमाणस्यादित्यर्थः अस्याः शंकायाः परिहारग्रन्थरूपयोः सूत्रभाष्ययोरर्थ
प्रेतो जीवपरमेश्वरयोरंशांशिनोः परस्परधर्मसंकराभावमस्मादित्यर्थः स्पष्टीकृतः कथं जीवात्मा बन्धविद्याप्रतिविम्बभूता ईश्वरांशोऽपि न क्लेशमनुते सूत्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ले॰
चं॰टी॰
५

भाष्येणुविवदिताः ननु हस्तपादादिकं वयवानत्यादिवंभूतेश्वरेशित्वेनविवदितो न तत्ववणवी विंवप्रतिविंबयोरस्य लोके यथार्थसांकर्यं प्रसिद्धमतो न जी
वन्मुक्तानामीश्वरे प्रसक्तिरिति स्पष्टी च कारेति नन्वमुक्तस्येश्वरभावापत्तिर्नसिद्धान्तसंमता तथाहि यावत्सर्वमुक्तौ ईश्वरभावापत्तिर्मुक्तस्य निसिद्धा कोहि चर
ममुच्यमानस्यातिविंशेषचिन्मात्रस्वरूपेणैवावस्थानं तल्लक्षणमुक्तिस्तेनः प्राप्तःभ्युपमानानांनुसस्वतांश्वमात्रसरूपेणावस्थितानामीश्वरभावापत्तिर्नि
वगृह्णैश्वर्यप्राप्तिरूपा मुक्तिरिति परममुक्तोवहूनामैश्वर्यप्राप्तिरेकस्य न चास्त्येकत्वेऽपि बहूनामैश्वर्यप्राप्तावपि क्रमेण मुच्यमानानां चिराचिरकाले
ऐश्वर्यतत्तारतम्यं तारतम्येनैकोमेवकिंचित्कालमैश्वर्यं पश्चात्तदभाव इत्यादिरूपेणमतम्यकल्प्यते स्यात् तच्चतत्त्वतोऽपाध्यायोऽतिमात्राधिकरणविरुद्धं तच्च
हि समगुणविद्याफलभूतायामेवान्तरमुक्तावेव तारतम्येननु परममुक्तावितिनिश्चयस्यादिति नचतदधिकरणस्यापरममुक्तौवस्तुतस्तारतम्यनास्तीतिमतिपा
दनेनासमर्थं तथाचकाल्पनिकतारतम्येस्तत्यपिनतदधिकरणविरोधइतिवाच्यं सिद्धान्ते समगुणविद्याफलभूतावान्तरमुक्तावपिवास्तवतारतम्यस्याभावेन
समगुणमुक्तेष्वेवतारतम्यंनतुनिर्गुणविद्याफलभूतायां परममुक्तावितिव्यवस्थापनपरस्य भाष्यादेर्निरालंबनत्वापत्तेः मुक्तोभुक्तस्येश्वरभावापत्तिर्नोसिद्धा
न्तसंमता एवंस्थितेऽत्र कृतेकिंशांकाभाष्यपर्यालोचनेनेश्वरभावापत्तिर्भाष्यकाराभिमतेतिकल्प्यते किंवापरिहारभाष्यमाभासपर्यालोचनयातथाकल्प्यते
नाद्यः शोकेनसिद्धान्ताभिमतानामीश्वरभावापत्तिमापाद्यचोद्यकरणेपत्तेः नहिसर्वत्रसिद्धान्ताभिमतमेवार्थमवलंब्य पूर्वपक्षिणासिद्धान्तेनप्रसंविनिहमाशांक

यते जीवस्येश्वरांशत्वाभ्युपगमेतदीयेनसंसारदुःखभोगेनेश्वरस्यापिदुःखित्वंस्यात् यथालोकेहस्तपादाद्यन्यतमांगगतदुःखेनांगिनोदेवदत्तस्या
पिदुःखित्वंतद्वत् ततश्चतत्प्राप्तानांमहत्तरंदुःखंप्राप्नुयात् अतीवरसर्वावस्थःसंसारएवास्त्वितिसम्यग्ज्ञानानर्थक्यप्रसंगइतिशांकाग्रंथेनभामत्या

तइतिनियमोदपपत्तेर्द्वितीयकल्पस्यहिस्यमुक्तिस्थितिरीश्वरभावंप्राप्तानांमहत्तरंदुःखंस्यादितिशांकायांयथापरिहारःसम्भवति ईश्वरस्यसकलजीवदुःखैर्दुः
खित्वेपिनमुक्तानांमहत्तरंदुःखंप्राप्तिः तेषांशुद्धचिन्मात्ररूपेणैवावस्थानाभ्युपगमेनेश्वरभावापत्तेरनभ्युपगमादित्येकःप्रकारः ईश्वरस्यदुःखाभावेसम
र्थितेसतितत्प्राप्तानांदुःखंस्यादितिशांकाश्रुरीत्यापरिहृताभवतीत्याशयेनविंबप्रतिविंबभावकृतमेदाधीनयथाव्यवस्थासमर्थनंद्वितीयप्रकारस्तत्रयपरि
हारभाष्यभामत्यादिनैवंयत्रेषुप्रथमप्रकारंविहायद्वितीयप्रकारस्यैवावलंबनात् शांकाग्रंथोक्तमुक्तानामीश्वरभावापत्तिर्भाष्यकाराद्युक्तमतेतिप्रतीय
तेमुक्तेनैवाभिप्रायेणभामत्यादिस्फुटीकृतविंबप्रतिविंबभावकृतासंकरमुपपाद्यसमाप्तितेनेत्युक्तमितिपरवस्थितिःपरिहारभाष्यपर्यालोचनरूपो
द्वितीयप्रकारोपिमुक्तस्येश्वरभावापत्तावेनमयाग्रह्यसिद्धहेतुर्नभवतिपरिहारभाष्यादेर्प्रथमप्रकारमवलंब्यमुक्तानामीश्वरभावापत्तिर्नास्तीतेनाभ्युप
द्वैतन्यमात्ररूपेणैवावस्थानाभ्युपगमाद्दत्तोनज्ञानानर्थक्यप्रसंगइतिवास्त्वपरिहारेकार्थितेकिंज्ञानानर्थक्यशांकापरिहारेपीश्वरस्यसकलजीवदुःखैर्दुः १८
खित्वप्रसंगःपरिहृतोनभवतिइतितत्प्रसंगशांकाप्रविशिष्यतसापिशांकाभाष्येदिस्यात्तोच्यप्रथमप्रकारंविहायद्वितीयप्रकारमवलंब्यमहायत्नेनप
रमेश्वरस्यदुःखित्वप्रसंगःपरिहृतोभाष्यादविसितिवर्त्केयाकथनत्वात् परिहारभाष्यादेर्दिदिशु परमेश्वरस्यदुःखित्वप्रसंगपरिहारानन्तरं तथाचमुक्तानां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नीश्वरभावापत्तिर्नत्वपपत्तेरिति परापत्त्यादित्यनुपपत्तेस्वभावो यसंततादर्शनाच्च किंचकोदोषेमेतत्समाप्यायेसप्रकथाभवति त्रिधाभवति पंचधा सप्तधा नवधा चै
वेशुनश्चैकादशाख्यतः शतंचदशचैकंच सहस्राणि च विंशतिरितिवाक्येनपरब्रह्मविदोनेकशरीरपरिग्रहादिरूपमैश्वर्यंश्रूयतेनत्वशुक्तस्येश्वरभावापत्तिर्य
२४ वेष्वप्रमुक्तस्यैसंभवति तथा च सप्तकथाभवतीत्यादिवचनान्निर्गुणविद्याफलसमर्पकंनभवति किंतुसगुणोपासनाफलसमर्पकत्वान्निर्गुणविद्याफल
प्रशस्तार्थं निर्गुणविद्याप्रकरणे पठ्यतइतिभाष्यादिवक्ताराविरुध्यते तथा च सगुणविद्याफलविचारप्रस्तावेभाष्यं यद्यपिनिर्गुणायामेवविद्याया
मनेकधाभावविकल्पः पठ्यते तथापि विद्यमानमेवेदंसगुणावस्थायामैश्वर्यं भूमविद्यास्तुतयेसंकीर्त्यतइति यदिमुक्तस्येश्वरभावापत्ति स्तत्र भाष्यकार
योरभिप्रेतास्यात्तदासप्तकथाभवतीत्यादिवचनस्यनिर्गुणविद्याफलसमर्पकत्वेनप्रकरणेसमवेतार्थस्यसगुणविद्याफलसमर्पकत्वायोगादेतद्वचनस्यनत
फलसमर्पकत्वमाश्रित्यसत्त्वभाष्ययोःप्रवृत्तोभाष्यकृतोमतिनिर्विकल्पामननादित्यादिविचारोनिरालम्बनएवस्यात् ब्रह्मलोकगतस्यसगुणोपासकस्यस्थूलश
रीरसत्त्वेजैमिनिराचार्योमन्यते सप्तकथाभवतीत्यादिनानेकधाभावविकल्पश्रवणात्स्थूलशरीरभेदंविनापकस्योपासकस्यानेकधाभावासंभवादितिसूत्रार्थः

दिशुक्तस्यश्रीकृतं विंबप्रतिविंबभाववृत्तात्संकरत्वपापाद्यपसमादित्येनभाष्यकारोमुक्तस्येश्वरभावमनिस्पष्टीचकार सायुज्यायाऽप्येपि संध्येसृष्टिराहहिरण्यधिक
रणेस्वप्नप्रपंचस्यमिथ्यात्वेनबाधितेनतत्राभिप्रायाभ्युक्तेस्वप्नप्रपंचेजीवस्यकर्तृत्वमापांशकापराभिध्यानात्तुतिरोहितंततोह्यस्यबंधविपर्ययाविति सूत्रेणजीव
स्येश्वराभिन्नत्वात्तदपिसत्यसंकल्पत्वादिक तस्माऽपाद्रुतपोकाभाष्यग्रंथस्यपूर्वापरभाष्यादिग्रंथस्यचमुक्तानामीश्वरभावापत्त्यावनस्थ्यास्तिस्थःसमा
णत्वाभावाऽपाद्रुतानेकाधिकरणेतत्वाख्यादिविरोधाच्चसाभाष्याभिमतेतिकल्पयितुंनशक्यतइत्यस्वरसादाहसत्यमाभ्याःयेपीति ब्रह्मविद्यासाधनेचेदृगष्पादिप्र
तिपादकत्वातीयाध्यायेपीत्यर्थः साधनाध्यायेपिसत्त्वकारस्तत्राभिप्रायंवर्णयन्भाष्यकारस्यमुक्तस्यपरमेश्वरभावापत्तिंस्पष्टीचकारेतिसंबंधः संध्येसृष्टिराहहि
त्यधिभावेस्वप्नावस्थायांरथादिसृष्टिः सत्याभवितुमर्हतिहियस्मात्श्रुतिराहरथादिसृष्टिमथरथान्रथयोगान्पथः सृजतइत्यादिकानहिस्वकृतिस्वप्नसृष्टिरसत्याभ
वितुमर्हति वियदादिसृष्टौ प्रकृतिसिद्धायामसत्यत्वादर्शनादितिसूत्रार्थः रथयोगोस्वात्कर्तृत्वमाधोक्नोति यथाग्नेः पास्यविस्फुलिंगस्याग्नेरिवदहनप्रकाशनसामर्थ्य
मस्तितथाजीवस्यपरमेश्वरांशत्वात्तद्वदेवजीवस्यापिस्वप्नादिसृष्टिशुद्धतोसत्यसंकल्पत्वादिलक्षणंसामर्थ्यमस्ति श्रुतेतस्यस्वप्नसृष्टौकर्तृत्वंसंभवतीत्याशंकार्थ
र्थः सर्वज्ञोजीवस्यसत्यसंकल्पत्वादिकमस्तिकिंत्वत्रतिरोहितंवर्ततेसंसारदशायामतोनस्वप्नादावुपयोगस्तस्यतच्चतिरोहितमैश्वर्यंपरस्यविभ्रूतेश्वरस्याभिध्याना
दीश्वरसाक्षात्कारेयत्नात्तिरोधायकनिवृत्ताविभेज्यतेईश्वरध्यानादभिव्यक्तेरेहेतुमाह तत इति प्रियस्मात्कारणात्ततईश्वरात्ज्ञानाद्धेयोस्यजीवस्यनतस्वता
नाद्बंधविपर्ययेवन्ययोर्विभावइतिसूत्रार्थः स्वप्नेसत्यहेतवीश्वराभिन्नत्वादितिजीवस्यसत्यसंकल्पत्वादिलक्षणैश्वर्याविभावार्थंयतमानस्यश्रवणमननना
त्मकविचारमन्तरेणतःक्रमेणपरमेश्वरमभेदेनध्यायतःकस्यचिदेवप्रतिबन्धरहितस्यश्रवणमननध्यानानुष्ठानात्ज्ञानतिनेश्वरप्रसादात्संसिद्ध्याप्रतिबन्धप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परमेश्वरसाक्षात्कारवत इत्यर्थः । तिमिरेण रोगविशेषेण तिरस्कृता दृगस्य तस्य : शक्तिर्यथौषधवीर्याद् आविर्भवति तथेत्यर्थः । न स्वभावत इति । एवं चेद् यथोक्तसाध
नसंपत्तिं विनेत्यर्थः । शक्तिव्यक्त्यंगीकारेणेति । ईश्वरभावापत्तिं विना मुक्तस्य सत्यसंकल्पत्वाद्यभिव्यक्तिर्न संभवतीत्यर्थः । अत्रेदं विचार्यते किं शक्तिविशेषविशिष्टचै
तन्यरूपजीवगतस्य सत्यसंकल्पादेर्मुक्तावाविर्भावः प्रतिपाद्यते किं वा विवक्षितविशिष्टचैतन्यरूपेश्वरगतस्य नाद्यः । ईश्वरगतसत्यसंकल्पत्वाद्यपेक्षया जी
वे पृथक्सत्यसंकल्पादिसत्त्वे प्रमाणाभावात् । हीश्वरस्येव जीवस्यापि पृथक्सत्यसंकल्पत्वप्रतिपादकं प्रमाणमस्ति न च जीवस्येश्वराभिन्नत्वेन तत्समानधर्मवत्त्वमङ्ग
ना... लोके बिम्बमुखाभिन्नस्यापि प्रतिबिम्बमुखस्य बिम्बगतदानत्वादियमीदर्शनेन व्यभिचारात् जनकसाक्षात्कारात् विद्यानिवृत्तावविद्यानिरूपितप्रति
बिम्बत्वस्यापि निवृत्त्या प्रतिबिम्बजीवाश्रितसत्यसंकल्पत्वादेरुपयोगाभावस्य स्पष्टतया जीवे पृथक्कल्पनावैयर्थ्याच्च । न चैवं बद्धानामेव स्यादविद्याफल
भूतानां तत्सत्त्वे सत्यसंकल्पत्वादेरुपयोगोऽस्तीति न तद्वैयर्थ्यमिति वाच्यं तत्रापीश्वरस्यमानसत्यसंकल्पत्वाद्यभिव्यक्त्यैव ...मे न जीवे तत्समानैश्वर्यसत्तोहिते
त्यकल्पनावैयर्थ्यात् तस्मात्प्रतिबिम्बचेतनरूपजीवे पृथक्सत्यसंकल्पत्वादिकल्पने प्रमाणप्रयोजनयोरभावात् तथा बिम्बभूतेश्वरगतसत्यसंकल्पत्वाद्यैश्वर्यं बंधदशा
यां जीवान्नतिजीवाविद्याभिस्तिरोहितं सदीश्वरसाक्षात्कारान्मुक्तौ तेषामभिव्यज्यत इति द्वितीयपक्षोऽप्यनुपपन्नः सत्यसंकल्पत्वादीनामीश्वरस्याविद्याहे

तविद्यादोषात्तिरोहितमिति न तस्य स्वप्नप्रपंचसृष्टत्वं संभवतीति वदन् सूत्रकारः तस्य तत्तिरोहितं सत्परमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वांतस्य ति
मिरतिरस्कृतेव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत एव सर्वेषां जन्तूनामिति न सूत्राभिप्रायं वर्णयन्भाष्य
कारश्च मुक्तस्य सत्यसंकल्पाद्युपयोगि सत्यसंकल्पत्वाद्यभिव्यक्त्यंगीकारेण परमेश्वरभावापत्तिं स्फुटीचकार फलाध्यायेऽपि स्वेन रूपेणाभिनिष्पद्यत इ

त्यत्र नाभावात् न चेदानीमहं सत्यसंकल्पत्वादिगुणक ईश्वरोऽस्मीत्यनुभवाभावात्तद्विशिष्टस्येश्वरस्याहन्तर्वकल्पनमिति वाच्यं प्रतिबिम्बजीवानां बिम्बभूतेश्व
रस्य च कल्पितभेदाभ्युपगमेन तत्तत्प्रतिजीवं तस्य जीवानां साक्षात्काराभावे तदीश्वरसाक्षात्काराभावोपपत्तेः तद्विशिष्टस्येश्वरस्याहन्तत्त्वकल्पनावैयर्थ्यान्निर्विशिष्टस्ये
श्वरस्याहन्तत्त्वकल्पने विशिष्टावरकाविद्यानिवर्तकत्वानामसंभवेन तदनिवृत्तिप्रसंगाच्च । न च मम सत्यादिवाक्यजन्यज्ञानस्य शुद्धचिन्मात्रगोचरस्य तद्विशिष्टेश्वरविष
यकत्वाभावेन विशिष्टावरणनिवर्तकत्वात् विद्यायाः शुद्धचिन्मात्रावरकत्वाश्रयणेऽप्यैश्वर्यसत्यसंकल्पत्वाद्यैश्वर्यस्याविद्ययाऽतिरोधानासिद्धेश्च न च जीवस्य
स्वकीयत्वेनेश्वरगतसत्यसंकल्पत्वाद्यप्रतीतिरेवात्र तिरोधानं विवक्षितमिति वाच्यं तथा सति तदनन्तरं तिरोधानस्याविद्याप्रयुक्तावरणरूपत्वप्रतिपादन
विरोधात् तस्मादीश्वरगतसत्यसंकल्पत्वाद्यैश्वर्यस्य जीवाविद्यातिरोहितत्वे मैश्वर्यतिरोधानस्य तत्साक्षात्कारनिवर्त्यत्वं वाच्यं परामभिध्यानादिति सू
त्रतज्ज्ञाष्ययोः प्रकृतिरिति वक्ष्यमाणोक्तेश्चास्यासत्त्वसाम्यपेक्षत्वादन्वसर्वज्ञात्मसुनिमित्तेषां वचनात् तल्पवादरायणस्य तदिति मुक्तस्येश्वरभावापत्तौ तेन तस्य त्वादे
कत्वादिमानमिश्वरस्याह फलाध्यायेऽपीति केन रूपेणेति किं सर्वज्ञत्वसर्वेश्वरत्वाद्युपहतपाप्मत्वादिगुणविशिष्टेन रूपेणाभिनिष्पत्तिः किं वा शुद्धचि १०
न्मात्ररूपेणावातिष्ठते यद्वा ह्युभयविधेन रूपेणेति जिज्ञासायां तन्नामित्यर्थः । उपन्यासेनेति उद्देशरूपवाक्यजातेनेत्यर्थः । यत्र ... पूर्वपक्षस्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सोन्वेष्टव्यः निर्विचारविधानात्तथाप्यसर्वैश्वर्यस्य मायोपकल्पितमेतेन पत्न्यादिनाविचिदिर्षतीति तद्देहेनेयज्ञादिक्रियायाउपन्यासग्रहणं सर्वज्ञत्वादिव्यपदेशास्या
पुपलक्षणं तथाचव्यपदेशः यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः इत्यादि व्यपदेशो नाम यो वाक्यसंदर्भउद्देशान्यो न भवति विधिरूपश्च न भवति तत्र पर सर्वज्ञत्वादि
सदर्भश्च नोद्देशान्यः विधेयाद्युपलंभात् नापि विधिर्यत्तु हृद्यदित्वेनानुवादत्वमतीते लयावस्था कोशप्रक्षणवास्तवेनथ धर्मजाते न फलको वतिष्ठते क्रतुरुपन्यासत्व
पदेशाविधिस्यस्तस्य ब्रह्मात्मतया तदुपयोगेन क्रतावुपन्यासिनेत्यर्थः सगुणस्य चन्द्रप्रकृतेर्ब्रह्मणि स्थितो ज्ञानं तत्र तन्नेश्वर्या वेदनेनाग्नि मुक्तात्मसंबन्धिशस्या वेदनेन त्ता
पकेन विधिवाक्योनेतियावत् श्रुतौ नेत्ताप कवाक्यस्या पुमतिविधिन स्वीकारात् चितितन्मात्रेण चितिरेवेतंस्य चैतन्यमात्रं रूपं तेनैव मुक्तो वतिष्ठत इत्यर्थः यथाल
वणपिंडो बहिरंतः स्वलवणैकरसः एवमेवारे अयमात्मानंतरोबाह्यः कृत्स्नः प्रज्ञानघन एव इत्यादि श्रुत्या कृतनयेन मुक्तो ब्रह्माभेदेन विद्यमानस्यन
कारिखदुर्गौलोमि ब्रह्मत्वरूपेमुक्तेउपन्यासात्पूर्वभावादविरोधं बादरायणः तत्र यत्तु तत्र मुक्तौ यत्पर्यविषयः बाभावेन तत्कथं त्वादितिना सर्यको औडुलोमिमते इदं चैमनतद्वयेपूर्वपदः स

तिमुख्यमानविषयायांश्रुतौ केनरूपेण ताभिनिष्पत्तिर्विवक्षितेति तु भगवतापां ब्राह्मेण जैमिनिरुपन्यासादिभ्य इति सूत्रेण यद्ब्राह्मं रूपमपहतपाप्मत्वादि सत्य
संकल्पाद्यवसानं सर्वज्ञत्वसर्वेश्वरत्वादिच तेनाभिनिष्पत्तिर्ग्राह्या एवं तथाभिसंपाद्य उपन्यासेन स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा सात्पा
येश्वर्यावेदनेन चेति जैमिनिमतं चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिरित्यनेन तत्तत्त्रेण एवं वा प्रथमान्ताने तुरीयावस्थः कृत्स्नः प्रज्ञानघन एवेत्यादि श्रु
त्या चैतन्यमात्रस्वरूपमितस्तदुगतेस्तन्मात्रेण अभिनिष्पत्तिरितिमन्तानं तदेवाप्यस्य एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण इति सिद्धान्तसूत्रेण वस्तुरूपा
वैतन्यमात्ररूपत्वेपि पूर्वोक्तगुणकलापस्योपन्यासात् प्रवृत्तस्य मायामयस्य वस्तुरूपस्य स्वरूपस्यासंभवात्नान्यतिव्यविरोधइत्यवरोधं वदन् तत्र कारः स
त्रेयमिदमुक्तार्थपरत्वेनव्याकुर्वन्भाष्यकारस्य ग्रन्थस्यस्वरभावापत्तिस्थमनुमनेभामती निवेशमप्नतयमृकृतस्यपरदितिनमिदं सूत्रजातं भगवतो भा
ष्यकारस्यो पादर्तनवचनं तत्त्वार्थ बादुर्वर्णने

त्रेयाचक्षे वस्तुरूपेति परमार्थतस्त्वर्थः जैमिनिमतस्य गुणकलापस्य वास्तवत्वानभ्युपगमात् चिन्मात्रत्व
प्रतिपादकश्रुतिविरोधः औडुलोमिमते इव गुणकलापस्य तदर्हत्वानभ्युपगमात् गुणकलापश्रुतीनां विरुद्धत्वापत्ति रूपो विरोधो नास्तीत्यर्थः एवमप्यु
पुक्तस्य सोपाभागेन चिन्मात्रतत्त्वे पन्यासोपन्यासाद्यवगतगुणकलापादेरपि पूर्वभावादित्यनेन सोपभागेन मुक्तात्मस्य गोरकमनतावदीश्वरभावापत्तिर्विना मुक्त
गुणकलापाद्ययोगात् तस्य ईश्वरभावापत्तिः स्वेभानीत्यर्थः श्रुत्यार्थस्य भाष्यादिकमपि न श्रुति हृलेकिं बहुकृत्तमेवेत्याहुः सूत्रद्वयमिन्मादिना संकल्पादेव तु
ते मुक्तस्येश्वरभावापत्तिस्वीकारे विवक्षेतेश्वरस्य साधकानुग्रहार्थं मायामयशरीरांगीकारेण मुक्तोपि शरीरं वस्त्रादन्यथा रतिक्रीडादिश्रुतिरित्येवं स्वीयाशरीरान्
तथा चाशरीरत्वावसंतमितिस्मर्तामुक्तस्याशरीरत्वप्रतिपादनं विरुध्येत कथमिदमशरीरत्वं तस्य चतो निजित्वा सामर्थ्यविधायामसप्ताप्त्वं ब्रह्म शोभितस्यान
त्वमपद्यते नान्यथेति प्रतिपादनार्थमशरीरत्वप्रतिपादकवाक्यांतरं परं ज्योतिरुपसंपद्येतिवाक्यमिति प्रतिपादकज्योतिरधिकरणभाष्यं च विरुध्येत परब्रह्म
ब्रह्मसाम्यं तत्समपि शरीरत्वाभ्युपगमात् तथाचतदधिकरणभाष्यं सशरीरत्वावस्थामिति चाशरीरतापेक्ष्येति से पनेरस्याभिधानात्कृत्स्नभावाद्वाम्यत्वाशरीर

सि॰ले॰
व॰टी॰
११

रीरत्वाद्युपपत्तेरिति न्यायनिर्णये विवृतं। किंच सर्वेश्वरभावं प्राप्तस्य मुक्तस्य तज्ज्ञानाभावनिरूपणात् संसारविद्याफलभूतेश्वरभावापत्तिरुपपन्नाभिवयोर्हंत्वाभ्यां सार्थ
ह्यवंशो कस्मिन्दानीमीश्वरस्य प्रवृत्तिर्शक्तिसमाधानेनाभ्युपगम्यते न वा नाद्यः। सर्वो मोक्षार्थं निवृत्तत्वेन तथानुसंधानासंभवात् उपाध्येकस्याव्युत्पत्त्यानप्रयोजकत्वादीश्व
विरहत्वात् न द्वितीयः ईश्वरभावापन्नो केवलस्वरूपेणैवावस्थानापेक्षामुक्तस्य फलत्वे विशेषाभावात् तेनावाप्त्युपपादनस्यानतिप्रयोजनत्वापत्तेः। तस्मान्मु
क्तस्येश्वरभावापत्तिश्रुतिप्रतिपादनं यत्तत्त्वंस्य स्यादित्याशंक्य तत्र नद्युक्तमित्यभिप्रेत्य आह विरहप्रयोजनं सृष्टं चेति श्रुतपदवाच्यायत्तामणेयावत्सर्वमुक्तिः सर्वेश्वर
भावापन्नात्वत्वात्तासांयथा काममस्तदरं समन्तात्तिनियायमुक्तानांमुक्तौ चेतनस्य भावापत्तिः तस्मिन् इति तत्त्वं ब्रह्मण्येश्वर्यापर्यंत मुहूर्तानादौ हि तैरेव मुक्तानां यावत्सर्वमु
क्तिविशेषेश्वरभावापत्ते श्रुतीनां स्वामिभिः सिद्धांतलेशसंग्रहे समर्थितत्वेनाविर्भूतस्वरूपस्य सत्यकामत्व सत्यसंकल्पत्वादिकं चोपपद्यते तस्य मुक्तेचेतनस्य भावापत्ता
वपि तत्सर्वमुपपद्यते एवं मुक्तचेतनस्य जीवेश्वरवत्तत्त्वस्तचेतनस्य सामान्यात्मकेनावस्थानादेतत्पवसानात् ... यावत्सर्वमुक्तिः सर्वात्मनायत्तिरस्मीति
वामदेववच्छुतवदनुभूयादिभावापत्तिः श्रूयते एवं च मुक्तस्य सार्वभौमादि मानुषानंदनाद्यादिलोकपालानंदनादहिरण्यगर्भानंदलाभानुभवविरुद्धत्वानुच
जवद्यमादिकं सर्वे लोककामाभावाभिमतं ब्रह्मलोकसमाहितस्य कामाद्यनुभविरुत्वं च ब्रह्मपदे शब्दप्रकामित्वं निज नृणांहि प्रणवमभ्युपपद्यत इत्यादि ग्रंथेन तथा च

न च मुक्तस्य सृष्ट्यादिनिर्वाहकत्वेन सूत्रभाष्यवाचनजानस्येश्वर्यमिज्ञानतिरोहितेश्वराणामभिव्यक्तता सर्वोच्चत् शारीरिकः सूत्रकृतस्य यत्तत्तदुपपेय्यो हि तत्सु
क्तेनोदितसंदेहपशरीरकोक्त्या मुक्तस्येश्वरभावापत्तेः स्वपादाभ्युपेयत्वाद्वेदतद्व्याख्यानविरोध इति वाच्यं तस्मान्मुक्तानामीश्वरभावापत्ते रेवमुपाभ्युपेयत्वादेतदसंभवमेव इति विवेश्वरवादे दा
षः तदाकूः कल्पनकारात् नमायायाप्रतिबिंबस्य विशुद्धेन उपसंपद्यते इति एतदसंभव श्रेकजीववादपारमार्थिकजीवभेदवादयोरपि दोषः एवं केचिदूचुः

नदनुसारेणाभ्युक्तत्वस्वभाष्यादौ ब्रह्मस्येश्वर्यस्य मुक्तजीवगतत्वांगीकरणं मुक्तस्य ब्रह्मरूपेणावस्थानाभ्युपगमे प्येकजीवमितिमनइवार्तिकानेनादैत विशेषत्व
स्वरूपस्य जीवानन्तरविद्याकृतेनत्वाभ्युपगमादिह्यत्वेनावलाद्यपरं नत्रमुक्तस्येश्वरभावापत्तिपरमितिसंदेहः नन्वध्यायचतुष्टयेपूपात्तस्फालिसूत्रभाष्या
दिषु ग्रंथजातस्य सर्वज्ञात्मसुनिभिरुपदर्शितफलिकाभिः शोभ्यत्वादसप्रतीतेः कथंमुक्तस्येश्वरभावापत्तावेनच्युत्स्यादिकं प्रमाणं स्यादित्यतआह नचेति एतावन
युमनेन वक्तुंशक्तिसूत्रभाष्यादिविरोधात् सदेहपाशारीरकमंतेहृदये मिनिरूपितेन ग्रंथसंक्षेपसारिणा सन्तसम संक्षेपशारीरकेश्वपत्वादि लक्षणं मैश्वर्यं चोपेयमुक्तोऽभ्यानादभिव
व्यते सुदितसूत्रकृतेत्यर्थः अभ्युपेयत्वादत्वेतेनमाह उक्तहेतोरिति मुक्तस्येश्वरभावापत्तिप्रमाणत्वेनोदाहृतश्रुतिभाष्यादिकेव्याख्यायानेश्वरस्यात्मरूप
णमुक्तस्येश्वरभावापत्तिप्रपत्ति उपपत्तिरूपायाः फलकोशस्वामिभिः प्रदर्शितास्ताः सर्वापि वाग्रोक्तहेतोरित्यनेन विवक्षिते तिमंतव्य तस्मादिति उक्तप्रमाणवलादित्यर्थः
मुक्तस्येश्वरभावापत्तिरेव नहीत्यर्थः उपलभ्यतोऽप्यमाप्यता एकेति एकजीववादेतदसंभवः भोगवदर्शितः पारमार्थिकेति पारमार्थिकोजीवेश्वरयोर्भेद इति वादेपि
मुक्तस्येश्वरभावापत्त्यसंभवो दोषः इत्यर्थः एतदुपलक्षणं शुद्धब्रह्मरूपेणावस्थानलक्षणमुक्त्यसंभवोपि पारमार्थिकजीवेश्वरभेदवादे दोषः इति बोध्यं नत्वप्रजाय
तिविद्यायामुक्तस्यापहतपाप्मत्वादिगुणाष्टकप्रतिपादने तत्र मुक्तस्येश्वरभावापत्त्यनभ्युपगमेन संभवतीति तस्य तज्ज्ञावापत्तिरेष्यस्ताच पारमार्थिकजीवेश्वरभे
देन संभवतीति केवलत्वाभिप्रायः सत्यानुपपन्नः भेदपक्षेपि रूपितस्याभ्यां निरूपितस्य मुक्ते गुणाकलापस्य मुक्तेश्वरभावापत्त्या विनापि संभवादिति दिति नामध्येके विकृतिसूत्रव्याख्या ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तारतम्येनांशमतभेदरूपत्वमिति यदित्यादिना तत्रापीति मुक्तजीवेष्वपीत्यर्थः तथा सतीति जीवस्य स्वरूपतः अपहतपाप्मत्वाभ्युपगमे सतीत्यर्थः इति यावदंशाः तत्राद्वैदि
दितिसत्त्वभागेन कृतात्तस्याप्याविर्भूतस्वरूपस्य त्रिविधपरिहारभागेन मुक्तजीवेश्वरणप्रकाविर्भावकथनेन विपरीतारम्भाद्वादितमर्थः मुक्तब्रह्मणोर्भेदपदे गुण
कोलापस्य जीवस्याधारत्वस्य ब्रह्माधारत्वरूपब्रह्मलिङ्गत्वालाभाद् दहराकाशस्य ब्रह्मत्वनिर्णायकेगुणाष्टकेन स्यादिति भावः भेदपदे मुक्तजीवगतस्याप-
हतपाप्मत्वादेर्जीवसत्त्वादेशविशेषो ब्रह्मणि न विद्यत इति ननु भेदवादिनां मते मुक्तानामपहतपाप्मत्वादेर्जलणाश्चैक्यं तस्य चुब्रह्मत्वमास्थितमतमाह परेषाम्
पीति भेदशक्तिर्जीवब्रह्मभेदपदे ब्रह्मलक्षणगुणवतो जीवस्य चिन्मात्रत्वायोगादिति भावः किञ्च किं शक्तत्वेन मुक्तावुत्पद्यते किं वा नित्यसिद्धमिति विकल्पने
मनसि निधायाद्यं निराकरोति हृदयेक द्वितीयं परिशेषयति संपद्याविर्भावश्रुत्यादिना तत्रेति संपद्याधिकरणोक्तेरित्यर्थः स्वेन स्वरूपेणाभिनिष्पद्यत इत्यनेन
निरभिधीयते सा किं मार्गानुकस्य स्वरूपस्योत्पत्तिर्वसर्गादिरूपोपपत्तिवद् विवदिता किं वा आत्मस्वरूपस्यैवाविद्यया तिरोभावमात्ररूपाविवदितेति संशये पु
केत्यादि स्वर्गादिवत् फलत्वात् तदन्तराक्तिशायास्वरूपनिष्पत्तिर्मुक्तिरिति पूर्वपक्षनिषेधपूर्वकं सिद्धान्तमाह आगन्तुनाकेनेत्यादिना कथं तर्हि पर्य
तिमिह च्यते भेदस्य पारमार्थिकत्वेन मुक्तौ जीवस्येश्वरभावाभावेऽपि तत्रापीश्वरवत् स्वरूपगतापहतपाप्मत्वादिगुणसंभवाद्विरोधः इति तन्न कुत इत्याह सति
जीवस्यापहतपाप्मत्वादिकमस्तीति नित्यस्य ब्रह्मलिङ्गत्वमिति शङ्कापरिहाराभावेन उत्तराच्छेदाविर्भूतस्वरूपस्येति सूत्रविरोधात् आक्षेपेण ने
मितिरितिसूत्रे जीवगतस्यापहतपाप्मत्वादेरुपन्यासादिभ्य इत्यादिहार्थत्वेन परेषामभिमतस्य जक्षत्क्रीडन्रममाण इत्यादिश्रुतिर्हि त
स जेद्राणदेश्वब्राह्मणनिर्देशाविरोधाच्च भेदे तद्गुणानामसत्त्वे न चिन्तनमात्रेणेति सूत्रोक्तस्य मुक्तजीवानां चेतनमात्रत्वस्यैवमपीति सिद्धान्त
स्त्रैगीकारविरोधाच्च संपद्याविर्भावः स्यादधिकरणविरोधाच्च न तर्हि स्वेन रूपेणाभिनिष्पद्यत इत्युक्तो आगन्तुनाकेन विरूपेणाभिनिष्पत्तिर्वो
च्यते स्वेन शब्दवैयर्थ्यापत्तेः येन रूपेणागन्तुना स्वयमभिनिष्पद्यते न स्यात्मीयत्वस्यावक्तव्यत्वात् तस्मादात्मवाचित्वस्य शब्दोपादानात्तिस्मासिद्धेन
स्वस्वरूपेणैवाभिनिष्पत्तिर्विवक्षितेति नन्वेकेन विरूपेणेति वस्यापि तत् किं चेदमपहतपाप्मत्वादिजीवस्य मुक्तावागन्तुकं चेत् संपद्याविर्भाव
मत आह येनेति स्वर्गाद्यागन्तुकरूपवद् मुक्तिलक्षणं स्वरूपमुत्पद्यते मुक्तस्य तत्स्वशब्देनामुक्तावपि स्वीयमेव भवत्यतः स्वशब्दस्य स्वीयवाचित्वे वैयर्थ्यमे
वेत्यर्थः तस्मादिति आगन्तुकरूपाभिनिष्पत्तिर्मुक्तिरिति पक्षे स्वशब्दस्य स्वकीयार्थकत्वानुपपत्तेर्वा केवलत्वेनोक्तेरात्मैकवचनोपपत्तेरित्यर्थः आत्मेति स्व
कीयइवस्वस्वरूपेऽपि स्वशब्दस्य रूढत्वेन नानार्थत्वस्वसति स्वकीयार्थकत्वस्य प्रकृतेऽसंभवादात्मस्वरूपवाचित्वेन निश्चितमिति भावः इदमेवात्मवाचित्वपदो
पादानप्रयोजनं यन्मुक्तेः स्वर्गादिवदागन्तुकरूपत्वनिराकरणमन्यथात्मवाचिस्वपदवैयर्थ्यादेवेति बोध्यम् स सर्वसंकल्पत्वादिरूपस्य स्वेन रूपेणेत्यत्र श्रुति
त्वेनाभिमतस्यागन्तुकत्वपदे तदागन्तुकत्वनिषेधकाधिकरणविरोधवत्तस्य वेषदशायां तिरोधानप्रतिपादकसूत्रेण श्रुतिदशायामाविर्भावप्रतिपाद
कसूत्रेण च विरोधो भवेन्मुक्तावभिनवतयोत्पद्यमानस्योक्ततिरोधानाविर्भावयोरयोगादित्याह किं चेदमिति द्वितीयविकल्पपरिशेषस्य फलमाह इति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ ले॰
व॰ टी॰
१२

बंधस्येति श्रुपहतपाप्मत्वादेरीश्वरस्येव जीवेपि नित्यसिद्धत्वादिति शाहार्थः न देवी मध्यादयाति निम्नसिद्धामिति तन्मूलेति प्राप्तसंबंधमूलकेनर्थः एवंचेति बंधस्य
मिथ्यात्वे सतीत्यर्थः न तु किंचिद्बंधस्य मिथ्यात्वसाधनेन तस्य सत्वेपि जीवब्रह्माभेदबोधन सम्भवादिति भास्करमतमाशंक्याह अक्रमेति वन्ध्यस्य सत्वमनेप
यमात्मशात नित्यमुक्तत्वस्यापि सत्वेन परमार्थभूतं विरुद्धधर्माक्रान्तयोर्जीवब्रह्मणोर्दहनतुहिनयोरिव प्रतीतिविरोधाभेदासंभवादित्यर्थः अग्रुणेति व
धस्य मिथ्यात्वस्वीकारसद्वके जीवब्रह्मणोरभेदानंगीकारइत्यर्थः कुतास्तिरोधानोत्पत्योगा इति चेत् तत्र वक्तव्यं किं जीवगतस्य नित्यसिद्धस्य सत्यसंकल्पा
देस्तिरोहितत्वपराभिधानादिति सूत्रेणाभिधीयते किंचेश्वरगतस्यैव जीवप्रतितन तिरोहितत्वमभिधीयते नाद्य इत्याह नहीति यत्किंचिदर्थगोचरोपि सत्य
संकल्पस्तिरोहितो नेष्यते सर्वार्थगोचरः सत्यसंकल्पस्तिरोहितोस्तीति नेष्यते इति किंमु वक्तव्यमित्यर्थः ग्रेद्वेति भिन्नेवेत्यपि शाहार्थः न हि सिद्धानेमति

इति मुक्तावागंतुकरूपानिषेधेन पराभिध्यानात्तु तिरोहितंऽत्तरार्धे दाविर्भूतस्वरूपात्त्वित्यपहतपाप्मत्वादेर्बंधमुक्त्योस्तिरोभावाविर्भावप्रतिपाद
नेन च विरोधः स्यादिति नित्यसिद्धं वाच्यमिति बंधस्य मिथ्यात्वे दुर्वचं नित्यसिद्धमपहतपाप्मत्वं हि सर्वदा पापरहितत्वेन च वस्तुतः सर्वदा पाप्मवा
हिरहितेन पाप्मसंबन्धस्तन्मूलकं कर्तृत्वभोक्तृत्वसंबंधो वा पारमार्थिकः संभवति एवं च जीवेश्वराभेदोपि दुर्वारः श्रुतिबोधितस्य भेदप्रतिरोधिस
बंधस्य सत्वाभावात् अन्यथा तस्यापि नित्यसिद्धसंकल्पतिरोधानोत्पत्योगात् नहि जीवस्य संसारदशायामप्यनुवर्तमानो यत्किंचिदर्थगोचरः क
श्चिदस्यावितथसंकल्पस्तिरोहित इति परैरपीष्यते किं त्वीश्वरस्य यन्नित्यसिद्धं निरवग्रहं सत्यसंकल्पत्वं तदेव जीवस्य संसारदशायामपीश्वरभेदा
नभिव्यक्तमस्वकीयत्वेनानवभासमानत्वं प्रति तिरोहितमिति स्येव समर्थनीयमिति चेदुक्तदोषप्रसक्तितादवस्थ्यात् नन्वपहतपाप्मत्वेन पाप्मविरहः किं
तु पाप्मफलकनिष्कर्माचरणेपि पापोत्पत्तिप्रतिबंधकशक्तियोगित्वमिति न तस्य नित्यसिद्धत्वे बंधस्य मिथ्यात्वप्रसंगः एवं सत्यसंकल्पत्वमपीश्व
रेच्छयैव निर्वाच्यमिति तन्नेश्वरभेदप्रसंग इति चेत् मैवम् एवं पारमार्थिककल्पनेप्रमाणाभावात् नहि पापजननप्रतिबंधकशक्तिः संसारपरिश्र

विंबचैतन्यरूपेषु जीवेषु विंबचैतन्यरूपेश्वरगतसत्यसंकल्पत्वाद्यपेतया पृथक्सत्यसंकल्पतिरोधानोत्पत्योगाच्च नहि त्वादिसंसारदशायां तिरोहि
तमस्तीति वक्तेतत्र अभ्युदयं जनयोरभावादेतच्च मार्गेवास्मदर्थिनं हितीयेतु कल्पेहृदंगत्वापि सिद्धान्तिमतमेवावलंबनीयं तथा च न पारमार्थिकभेदासि
द्धिरिति हृदयंगमाह किंचेश्वरस्येति ईश्वरेति विंबभूतेश्वरेण सह जीवस्य योवास्तवाभेदस्तदनभिव्यक्तेरित्यर्थः जीवब्रह्मणोरभेदापत्तिभयाज्जीवे पृथ
गेवापहतपाप्मत्वादिकं स्वीकृत्यवास्तवे बंधस्याविरुद्धत्वशंकेत न त्विति किन्त्वनिषिद्धकर्माचरणेपि पापोत्पत्तिप्रतिबंधकशक्तिरपहतपाप्मत्व १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सि॰ ले॰
च॰ टी॰
५३

शाद्यार्थत्वेन कल्प्यमाना किं विद्योदयात्प्राक्तनत्वप्रतिबंधार्थं कल्प्यते किं वा विद्योदयानंतरं त्वदभिमतमुक्तेः प्राक्तनत्वप्रतिबंधार्थं कल्प्यते प्रथमे वा
दभिमतमुक्तिकाले मुक्तस्य देहेन्द्रियादिसत्वेन पापमहे तु निषिद्धकर्माचरणसंभवान्नद्वितस्याप्रतिबंधार्थं कल्प्यते इति विकल्प्य मनसि निधाय द्वितीयं क्रमेण दूष
यति नहि त्वद्दिना इत्यादिना तत्रापि समतत्वादिरर्थः तस्य ब्रह्मणो याथिगमे साक्षात्कारे सति विद्योदयात्प्राक् स्वावाद्यस्य नाशो भवति तदुदयोत्तरकाले

मरणादशायां पापानुत्पत्त्यर्थं कल्पनीया तदानीं तद्भ्रान्तिरित्याह विद्योदयप्रवृत्तिस्तु विद्यामाहात्म्यादेवाश्लेषस्तदधिगमउत्तरपूर्वाघयोरश्लेषवि
नाशौ तद्व्यपदेशादिति सूत्रेण दर्शितः तत एव मुक्तावष्याश्लेषउपपद्यत इति प्रतिबंधार्था शक्तिकल्पना तस्मादुदाहृतश्रुतिसूत्रानुसारिणि मुक्तजीवास्पना
याव सर्वमुक्तिवस्तुसंशेतत्समानत्वाविरोधिवद्धपुरुषाविद्याकृतनिरवधिकैश्वर्यतदनुगुणगुणकलापविशिष्टनिरतिशयानन्दस्फुरणसमृद्धिः
सैवाधिवंधपरमेश्वरभावापत्तिरादर्तव्येति सिद्धम् ॥ इति श्रीशास्त्रसिद्धान्तलेशसंग्रहे चतुर्थः परिच्छेदः समाप्तिमगात् ४ ॥ विद्वद्गुरोर्विहितविश्व
जिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः श्रीरंगराजमखिनः श्रितचन्द्रमौलेरस्मायदीक्षित इति प्रथितस्तनूजः तंत्राण्यधीत्य सकलानिस
दावदान्यस्याख्यातकीर्तिकलाविशदीकृतानि प्राचीनायमलमसुकृत्य वसंप्रदायसिद्धांतभेदलवसंग्रहमित्यकार्षीत् सिद्धांतरीतिषु मयाप्र
मदृशितेन साहाय्यथापि लिखितेषु यदि किंचिदस्य संशोधने सहृदयाः सदयाभवन्तु सतां प्रदायपरिशीलननिर्विमोका इति श्रीशास्त्रसिद्धांतले
शसंग्रहः समाप्तिमगमत् ॥

तस्याचाश्लेषो भवति कुतः तस्य विद्यया ऽविद्यानाशादेः श्रुतिस्मृतिष्वपदेशात् कृत्स्नादिसिद्धत्वादित्यर्थः मुक्तस्येश्वरभावापत्तिरूपपादितामुपसंहरति उ
दृतश्रुतिस्मृतिभाष्यादिस्वारस्यादित्यर्थः स्वविरोधित्वे ऐश्वर्यविशेषणं तदनुगुणेति ऐश्वर्यानुगुणेत्यर्थः सारदृत्वमीश्वरभावापत्तिविशेषणम् ॥ श्री
कृष्णचरणद्वंद्वस्मृतिर्मंगलप्रदे यो निधेये कृतिरियं मलंकारार्थमर्पिता १ श्रीकृष्णस्मनसाध्यात्वा श्रीहृत्संसंतप्रणम्य च याख्यातो यं परिच्छेदः श्रीकृ
ष्णपरितुष्टये २ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीदिव्यश्रीचरणारविन्दसंलग्नरजोभृतस्याच्युतकृष्णानन्दतीर्थस्य
कृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां श्रीकृष्णालंकाराख्यायां चतुर्थः परिच्छेदः स्वरसवर्णध्वंसमगात् ॥

१२

Siddhanta leśa samgrahe

208

1541

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative